श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री नृसिंहमङ्गळनवरत्नमालिका ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री नृसिंहमङ्गळनवरत्नमालिका ॥

मङ्गळं स्तंभडिंभाय मङ्गळं मृत्युमृत्यवे।
मङ्गळं रौद्ररूपाय नरसिंहाय मङ्गळम्॥ १ ॥

हिरण्यकशिपुं हत्वा दैत्येन्द्रं देवकण्टकम्।
जगद्रक्षण धुर्याय जगद्बीजाय मङ्गळम्॥ २ ॥

प्रह्लाद स्तुति सन्तुष्ट प्रसन्न निजमूर्तये।
वरदाभय हस्ताय वरदाय च मङ्गळम्॥ ३ ॥

कराग्रैः वज्रसंस्पर्शैः नखरैः शत्रुधारिणे।
तीक्ष्णदंष्ट्राय तत्वाय तार्क्ष्यवाहाय मङ्गळम्॥ ४ ॥

नरकण्ठीरवाकार व्यक्तात्युग्र विभूतये।
मृगेन्द्राय नरेन्द्राय दैवतेन्द्राय मङ्गळम्॥ ५ ॥

किरीटहारकेयूर कुण्डलालङ्कृताय च।
कोटिसूर्य प्रकाशाय देवसिंहाय मङ्गळम्॥ ६ ॥

त्रियुगाय त्रिपृष्ठाय त्रिगुणाय त्रिमूर्तये।
नरकेसरिरूपाय लक्ष्मीलोलाय मङ्गळम्॥ ७ ॥

मत्स्यकच्छप वाराह सिंह वामन मूर्तये।
राम कृष्णात्मने बौद्ध कल्कि सिंहाय मङ्गळम्॥ ८ ॥

सर्वबीजाय सत्याय सर्वाधिष्ठान मूर्तये।
सर्वेश्वराय सर्वस्मै सत्वसिंहाय मङ्गळम्॥ ९ ॥

॥ इति श्री नृसिंहमङ्गळनवरत्नमालिका संपूर्णा ॥

www.prapatti.com